शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

अभिज्ञान शाकुन्तलम् नाम नाटकस्य चतुर्थाङ्कस्य श्लोक व्याख्या।

'पातुं न प्रथमं व्यवस्यति जलं युष्मास्वसिक्तेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्याः भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥'

प्रस्तुतोऽयं श्लोकः 'पुरा कवीनां गणना प्रसङ्गे कनिष्ठिकाधिष्ठित कालिदासः।' इत्यादि दिशा कवि मण्डल मण्डनायमानेन अप्रतिम प्रातिभ सम्पत्ति भासमानेन कविता वनिता विलासेन महाकविना कालिदासेन विरचितस्य निखिल नाट्यतल्लजभूतस्य काव्य कला कलितस्य सर्वथा नव नवस्य नाट्य साहित्य शिरोरत्नभूतस्य संस्कृत साहित्य शिरोरत्नभूतस्य संस्कृत साहित्य नवनीत स्वरूपात् अभिज्ञान शाकुन्तलम् नाम नाटकस्य चतुर्थाङ्कात् गृहीतोऽस्ति।

श्लोकेऽस्मिन् शकुन्तलां तत्पतिगृहप्रेषणाय सम्प्रस्थितो महर्षिः कण्वः आश्रम वृक्षेभ्यः शकुन्तला सर्वोपकारेभ्योऽनुज्ञां ग्रहीतुं प्रार्थयति —

या युष्मासु असिक्तेषु प्रथमं जलं पातुं न व्यवस्यति, प्रियमण्डनापि या स्नेहेन भवतां पल्लवं न आदत्ते, वः कुसुमप्रसूतिसमये आद्ये यस्याः उत्सवः भवति सा इयं शकुन्तला पतिगृहं याति सर्वैः अनुज्ञायताम्।

या = शकुन्तला युष्मासु = भवत्सु असिक्तेषु = जलमपीतेषु प्रथमं = पूर्वं जलं = पानीयमपि पातुं = ग्रहीतुं न व्यवस्यति = उद्योगं न करोति नेच्छतीति भावः, प्रियम् = अभीप्सितं मण्डनम् = अलंकरणं यस्याः सा अलङ्कारप्रियापि या स्नेहेन = प्रेम्णा भवतां = युष्माकम् पल्लवं = किसलयं न आदत्ते = नहि गृह्णाति न लुनाति, वः युष्माकं कुसुमानां = पुष्पाणां प्रसूतिः = उद्गमस्तस्य समये = काले आद्ये = सर्वप्रथमं यस्याः उत्सवः = महोत्सवं भवति = जायते सा इयं शकुन्तला पतिगृहं याति = गच्छति अतः सर्वैरपि = भवद्भिः अनुज्ञायताम् = अनुज्ञा प्रदानं कुर्वन्तु।

अत्र चतुर्थपादं प्रति पादत्रयस्य हेतुत्वात् काव्यलिङ्गम् — हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते इति लक्षणात्। शार्दूलविक्रीडितं वृत्तम् - 'सूर्याश्वैर्मसजास्तताः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात्।

उपेन्द्र झा
14/9/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
खुरसैला, अररिया

शास्त्री द्वितीय खण्डस्य तृतीयप्रश्नपत्रं (साहित्यम्)
<u>साहित्य दर्पणः षष्ठः परिच्छेदः</u>

क- अर्थप्रकृतयः ? कति च तासां नामानि । सोदाहरणं विवेचनम् ।
प्रकृतेः प्रयोजनं साधयति अर्थप्रकृतयः हेतवः । अर्थरूप = प्रयोजनस्य प्रकृतयः सिद्धिहेतवः इति अर्थ-प्रकृतयः । नाट्ये पञ्च प्रकारा भवन्ति । बीजम्, बिन्दुः, पताका, प्रकरी, कार्यम् इति ।

बीजम् — 'अल्पमात्रं समुद्दिष्टं बहुधा यद् विसर्पति ।
फलस्य प्रथमो हेतुर्बीजं तदभिधीयते ॥'
अर्थात् यदादौ अल्पमात्रं प्रदर्शितं सत् पश्चात् बहुधा = बहुभिः प्रकारैः विस्तारं प्राप्नोति = विविध आकारः कार्याणि जनयति तद् बीजम् = इत्यभिधीयते । तच्च नायकस्योद्देश्यस्य आदिकारणं भवति । तद् यत्र बीजवत् बीजम् । इत्यभिधीयते कविभिः ।
यथा — रत्नावल्यां वत्सराजस्य रत्नावलीप्राप्तिहेतुः दैवानुकूल्यं लाभादिकं यौगन्धरायणव्यापारः । यथा वा वेणीसंहारे नाटके द्रौपदी केशसंयमन हेतुः युधिष्ठिरो-त्साहः ।

बिन्दुः — 'अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् ।'
अर्थात् अवान्तर कथायाः समाप्त्या प्रधानकथायाः समाप्तेन अविच्छेदस्य यो हेतुः स बिन्दुः । जलेतैलबिन्दुवत् प्रसारित्वात् बिन्दुरिति व्यपदेशः । बीजं केवलं मुखसन्धावेव निबध्यते । बिन्दुस्तु नटनरसाति भेदः ।
यथा :- रत्नावल्यां अनङ्गपूजापरिसमाप्तौ कथार्थ विच्छेदे सति 'उदयनस्य इन्दोः इव उद्वीक्षते' इति सागरिका (उद्वेगम्) कथं एषो सो उदयणणारिन्दो' इत्या-दिरवान्तरार्थहेतुः ।

पताका — 'व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते ।' इति
या प्रासङ्गिककथा सुदूरं निर्वहणसन्धि पर्यन्तं व्याप्नोति सा पताकेति कथ्यते ।
यथा :- रामचरिते सुग्रीवादेः, वेणीसंहारे भीमादेः, शाकुन्तले विदूषकस्य चरितम् 'पताका' इति ।

प्रकरी — 'प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता' इति ।
अर्थात् नायकचरिते प्रसङ्गादुपस्थितम् प्रदेश विशेषे स्थितं चरितं = वृत्तान्तः, प्रकरोति नायक वृत्तान्तस्य प्रकर्षं जनयतीति प्रकरीमता । पताकायां प्रासङ्गिकवृत्तस्य बहुदेश व्यापित्वम्, अस्यां तु प्रदेश विशेष वृत्तित्वमिति भेदः ।'
यथा — कुलपत्यङ्के [illegible] जटायु संवादः ।
पताका नायकस्य प्रकरीनायकस्य वा स्वकीयं फलान्तरं भवति, किन्तु तयोः स्वीकृतेऽपि प्रधान नायकस्य फलसिद्धयेव भवति ।

कार्यम् — 'अपेक्षितं तु यत्साध्यमारम्भो यन्निबन्धनः ।
समापनं तु यत्सिद्ध्यै तत्कार्यमिति सम्मतम् ॥' इति
अर्थात् यत्प्रधानं साध्यम् यदुद्देश्यकस्य आरम्भः = उपाये प्रथम प्रवृत्तिः, यस्य सिद्धौ च सामग्री संग्रहः तत् कार्यम् इति उच्यते ।
यथा — रामचरिते रावणवधः ।
इत्यलम् ।

उपेन्द्र झा
14/9/20
शास्त्री प्रो॰ साहित्य
श्री॰ अ॰ सं॰ महाविद्यालय
कुरुक्षेत्र, पूर्णियाँ

शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

## अलङ्कार विवेचनम्

उपमालङ्कारस्य लक्षणोदाहरणं विवेचनम् ।

एकस्मिन्नेव वाक्ये उपमानोपमेययोः वैधर्म्यरहितम् इवादिप्रतिपादितं साम्यं उपमालङ्कारः । सा चोपमा, सामान्य धर्मः = द्वयोः सादृश्य हेतु, गुणक्रियामनोहरत्वादि औपम्यवाचकम् इवादि, उपमेयं मुखादि, उपमानं चन्द्रादि यदि वाच्यं भवेत्तदा पूर्णोपमा विज्ञेया । उक्तं च साहित्य दर्पणे —

'साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः ।' इति
तथा 'सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च ।
उपमेयं चोपमानं भवेद्वाच्यम् ........ ॥' इति

यथा :- 'इति विरचितवाग्भिर्वन्दिपुत्रैः कुमारः,
सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार ।
मदपटुनिनदद्भिर्बोधितो राजहंसैः,
सुरगज इव गाङ्गं सैकतं सुप्रतीकः ॥'

अत्र सुरगज उपमानम्, कुमार उपमेयम्, निद्रापगमपूर्वकतल्पत्यागः सामान्य धर्मः, इव शब्दः सादृश्यवाचकः, इति पूर्णोपमालङ्कारस्य उदाहरणम् । सा च श्रौती आर्थी चेति द्विधा । द्विविधाऽपि सा तद्धिते समासे वाक्ये चेति षट्प्रकारा पूर्णोपमा उक्तञ्च —

'श्रौती यथेव वा शब्दा इवार्थो वा वतिर्यदि ।
आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा वतिः ॥
द्वे तद्धिते समासेऽथ वाक्ये ......... ।' इति

तत्र श्रौती यथा :- 'सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ ।
हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले ॥'
अत्र क्रमेण त्रिविधा श्रौती ।

आर्थी यथा-
'मधुरः सुधावदधरः पल्लवतुल्योऽतिपेलवः पाणिः ।
चकितमृगलोचनाभ्यां सदृशी चपले च लोचने तस्याः ॥'
अत्र क्रमेण त्रिविधा आर्थी ।

मालोपमा :- एकस्योपमेयस्य यत्र बहूनि उपमानानि उच्यन्ते तत्र मालोपमालङ्कारः । उक्तञ्च —
'मालोपमा यदेकस्योपमानं बहु दृश्यते ।' इति
उदाहरणं यथा :- 'वारिजेनेव सरसी शशिनेव निशीथिनी ।
यौवनेनेव वनिता नयेन श्रीर्मनोहरा ॥'
अत्रोपमेय भूतायाः श्रियाः सरसी - निशीथिनी - वनिता रूपानेकोपमानत्वात् मालोपमाऽलङ्कारः ।

उपेन्द्र झा
14/9/20
एसो० प्रो० साहित्य
रा० उ० सं० महा०
मुरसेना, पूर्णियाँ